[KYV TB 2-7-7-3 to 2-7-7-9]

ॐ तेजो॑ऽसि । तत्ते॒ प्रय॑च्छामि । तेज॑स्वदस्तु मे॒ मुख᳚म् ।
ॐ tējō (a)si | tat'tēp' prayat'chhāmi |
tējas'vadas'tu mē mukham'm |

तेज॑स्व॒च्छिरो᳚ , अस्तु मे । तेज॑स्वान्-वि॒श्वत॑ः प्र॒त्यङ् ।
tējas'vat'chhirō , as'tu mē |
tējas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe |

तेज॑सा॒ संपि॑पृग्धि मा । ओजो॑ऽसि । तत्ते॒ प्रय॑च्छामि ॥१॥
tējasā sam'piprg'dhi mā |
ōjō (a)si | tat'tēp' prayat'chhāmi || 1 ||

ओज॑स्वदस्तु मे॒ मुख᳚म् । ओज॑स्व॒च्छिरो᳚ , अस्तु मे ।
ōjas'vadas'tu mē mukham'm |
ōjas'vat'chhirō , as'tu mē |

ओज॑स्वान्-वि॒श्वत॑ः प्र॒त्यङ् । ओज॑सा॒ संपि॑पृग्धि मा ।
ōjas'vā-neviśh'vata[fp]' prat'yaṅ'ṅe |
ōjasā sam'piprg'dhi mā |

पयो॑ऽसि । तत्ते॒ प्रय॑च्छामि । पय॑स्वदस्तु मे॒ मुख᳚म् ।
payō (a)si | tat'tēp' prayat'chhāmi |
payas'vadas'tu mē mukham'm |

www.SaiVeda.net

पर्य॑स्वच्छि॒रो॑ , अस्तु मे । पर्य॑स्वान्-वि॒श्वत॑ः प्र॒त्यङ् ।
पर्य॑सा॒ संपि॑पृग्धि मा ॥ २ ॥

payas’vat’chhirō , as’tu mē I
payas’vā-neviśh’vata[fp]’ prat’yaṅ’ṅe I
payasā sam’piprg’dhi mā II 2 II

आयु॑रसि । तत्ते॒ प्रय॑च्छामि । आयु॑ष्मदस्तु मे॒ मुखम्॑ ।
āyurasi I tat’tēp’ prayat’chhāmi I
āyuṣh’madas’tu mē mukham’m I

आयु॑ष्मच्छि॒रो॑ , अस्तु मे । आयु॑ष्मान्-वि॒श्वत॑ः प्र॒त्यङ् ।
āyuṣh’mat’chhirō , as’tu mē I
āyuṣh’mā-neviśh’vata[fp]’ prat’yaṅ’ṅe I

आयु॑षा॒ संपि॑पृग्धि मा । इ॒मम॑ग्न॒ , आयु॑षे॒ वर्च॑से कृधि ।
āyuṣhā sam’piprg’dhi mā I
imamag’na , āyuṣhē var’chasē kṛdhi I

प्रि॒यꣳ रेतो॑ वरुण सोम राजन् । मा॒तेवा॑स्मा , अदि॑ते॒ शर्म॑ यच्छ ।
विश्वे॑ देवा॒ जर॑दष्टि॒र्यथा स॑त् ॥ ३ ॥

priyagm’ rētō varuṇa sōma rājan’ne I
mātēvāas’mā , aditē śhar’ma yat’chha I
viśh’vē dēvā jaradaṣh’ṭir’yathā sate II 3 II

आयु॑रसि वि॒श्वायु॑रसि । स॒र्वायु॑रसि स॒र्वमायु॑रसि ।
āyurasi viśh’vāyurasi I sar’vāyurasi sar’vamāyurasi I

www.SaiVeda.net

यतो॒ वातो॒ मनो॑जवाः । यत॒ः क्षर॑न्ति॒ सिन्ध॑वः ।

yatō vātō manōjavā-ḥa |

yataḥa , kṣharan'ti sin'dhavaḥa |

तासा॑ँ त्वा॒ सर्वा॑साꣳ रु॒चा । अ॒भिषि॑ञ्चामि॒ वर्च॑सा ।

tāsāān' tvā sar'vāsāgm' ruchā |

abhiṣhiñ'chāmi var'chasā |

स॒मु॒द्र , इ॑वासि ग॒म्हना॑ ।सोम॑ , इ॒वास्यदा॑भ्यः ।

samud'ra , ivāsi gam'hanāā |

sōma , ivās'yadāābh'yaḥa |

अ॒ग्निरि॑व वि॒श्वत॑ः प्र॒त्यङ् । सूर्य॑ , इ॒व ज्योति॑षा वि॒भूः ॥४॥

ag'niriva viś'vata[fp]' prat'yaṅ'ṅe |

sūr'ya , ivaj' jyōtiṣhā vibhū-ḥu || 4 ||

अ॒पां यो द्रव॑णे॒ रस॑ः । त॒म॒ह॒म॒स्मा , आ॑मु॒ष्याय॒णाय॑ ।

apāñ' yōd' dravaṇē rasaḥa |

tamahamas'mā , āmuṣh'yāyaṇāya |

तेज॑से ब्रम्हव॒र्च॒साय॑ गृण्हामि । अ॒पां य , ऊ॒र्मौ रस॑ः ।

tējasēb' bram'havar'chasāya gṛṇ'hāmi |

apāñ' ya , ūr'mau rasaḥa |

त॒म॒ह॒म॒स्मा , आ॑मु॒ष्याय॒णाय॑ । ओज॑से वी॒र्या॑य गृण्हामि ।

tamahamas'mā , āmuṣh'yāyaṇāya |

ōjasē vīr'yāya gṛṇ'hāmi |

www.sanveda.net

अपां यो मध्यतो रसः । तमहमस्मा , आमुष्यायणाय ।
apāñ’ yō madh’yatō rasaḥa ।
tamahamas’mā , āmuṣh’yāyaṇāya ।

पुष्ट्यैं प्रजननाय गृण्हामि । अपां यो यज्ञियो रसः ।
puṣh’ṭyaiīp’ prajananāya gṛṇ’hāmi ।
apāñ’ yō yaj’ñiyō rasaḥa ।

तमहमस्मा , आमुष्यायणाय । आयुषे दीर्घायुत्वाय गृण्हामि ॥५॥
tamahamas’mā , āmuṣh’yāyaṇāya ।
āyuṣhē dīr’ghāyut’vāya gṛṇ’hāmi ॥ 5 ॥

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.SaiVeda.net